# Shri Shivastavagadyam

# શ્રીશિવસ્તવગદ્યમ્

## Document Information

Text title : Shri Shivastavagadyam 02 02

File name : shivastavagadyam.itx

Category : shiva, gadyam

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-02

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીશિવસ્તવગદ્યમ્

ત્રૈલોક્યસ્ય ભવાનેવ નિગ્રહાનુગ્રહક્ષમઃ ।
શ્રીવિશ્વેશ્વર માં પાહિ મહેશ્વર નિરીશ્વર ॥ (ગિરીશ્વર)
જય જય શ્રીરુદ્ર વીરભદ્ર । વિરિઞ્ચિપઞ્ચમશિરઃખણ્ડન
યજ્ઞપુરુષશિરઃખણ્ડન દક્ષપ્રજાપતિશિરઃખણ્ડન
દેવેન્દ્રશિરઃખણ્ડન પૂષાદિત્યદન્તપ્રહરણ
ખગાદિત્યનેત્રસંહારક ગીર્વાણજનનીનાસિકાચ્છેદક
સરસ્વતીનાસિકાચ્છેદક હવ્યવાહનજિહ્વાસમુત્પાટક
ઈશાનાદિદિક્પાલકપ્રાણોત્પાટન પાદાઙ્ગુષ્ઠાતિનિષ્ઠુર-
પ્રપીડિતરોહિણીવલ્લભ ચરણદલશિરોવિઘાતન
પ્રસાદિતગૌતમકશ્યપાઙ્ગિરસ પુરોગમમુનિવલ્લભ
પુણ્ડરીકલોચનોત્તમાઙ્ગવિનિપાતિતસમસ્તદેવતાવિઘાતન
નારાયણભુજસ્તમ્ભન બાદરાયણભુજસ્તમ્ભન
કન્દર્પદર્પોરુવિપિનદાવાનલ ત્રિપુરપયોરાશિબાડબાનલ
સનત્કુમારગર્વપર્વતભસ્મસાત્કરણકારણ
નરસિંહદર્પપ્રવિમર્દનકારણ બ્રહ્મવિષ્ણુમદાભિમાનનિદાનવિઘાતન
વિદ્યુત્સમાનાદ્યવસાનકમહાદહન જટિલિતમહિતોરુલિઙ્ગવિગ્રહ
કાલકૂટાનુગ્રહ દેવ ॥ ૧॥

લીલાવલોકન લલાટલોચનપ્રજ્વલનજ્વાલાવલીભસ્મીભૂતનન્દાદિગોમાસ્ત્ર-
સમૂહદૂરીભૂતભક્તજનમલયાતિસંહારકારણપ્રવાહ દેવ ॥ ૨॥

વિદ્યુન્માલિકાસુર-તારકાસુર-અન્ધકાસુર-જલન્ધરાસુર-લાલાસુર-
ભસ્માસુર-જાટાસુર-રાવણાસુર-વ્યઘ્રાસુર-ગજાસુરાદિ-
નાનાજગત્કણ્ટકમહાસુરમદપ્રભઞ્જન
પ્રેતપતિમદભઞ્જન સહસ્રલોકસાધારણજન્મજરામરણનિવારણ ।
અપિ ચ દેવ ॥ ૩॥

શ્રીમન્મહાદેવીશ્રીપર્વતપ્રિય કૈલાસપ્રિય અવિમુક્તપ્રિય
કેદારપ્રિય પાર્વતીપ્રિય કુમારપ્રિય વિનાયકપ્રિય
નારાયણપ્રિય નન્દિકેશ્વરપ્રિય મહાકાલપ્રિય કાલરુદ્રપ્રિય
વીરભદ્રપ્રિય ભૃઙ્ગીરિટિપ્રિય ચણ્ડેશ્વરપ્રિય ચણ્ડકીર્તિપ્રિય
ગોકર્ણભદ્રકર્ણલમ્બકર્ણકુમ્ભકર્ણવરાહકર્ણગજકર્ણઘણ્ટાકર્ણપ્રિય
મહાલય મહાવ્રત માહેન્દ્ર મહાબાહુપ્રિય અતિહાસાટ્ટહાસગુહાવાસ
ગુહેશ્વર હાટકેશ્વર ભસ્મેશ્વર અર્ધનારીશ્વર
પ્રિય-શ(ત)જિહ્વ-શતોદર-સહસ્રોદર-વજમધ્યોદર-
જિહ્મોદર-લમ્બોદર-કુમ્ભોદરપ્રિય
હવ્યવાહનસિંહૂર્તકસંવર્તકમેઘાવર્તકપ્રિય
કુન્દતરુમુદક-પિમ્પલપિઙ્ગલમધુપિઙ્ગલપ્રિય
વિશ્વરૂપ-વિરૂપાક્ષ-પઞ્ચાક્ષ-શતાક્ષ-સહસ્રાક્ષપ્રિય
પ્રપઞ્ચાન્તક લોકાન્તક યમહર મૃત્યુહરપ્રિય યશસ્વિભાસ્કર
દક્ષભાસ્કર કાષ્ઠકાલ-કૂટધૂમકેતુપ્રિય યમેહાન્દોલક
નીલકોકિલ પૂર્ણભદ્રસદ્યોજાત બ્રહ્મભક્ષણ વિષભક્ષણ
ભૃગુજટિલમુણ્ડધરશિખણ્ડધરપ્રિય કેશમહાકેશીજ્વલન
સૂર્યવર્ણ સોમવર્ણ સૂર્યાક્ષ સોમાક્ષ સૂર્યપેષણ ચન્દ્રપેષણ
ઇન્દ્રેન્દ્ર યમેન્દ્ર મેરુપાતન- વિન્ધ્યપાતનપ્રિય શતમાય
મહામાય લિઙ્ગાક્ષ પિઙ્ગલાક્ષ પર્વતાસ્ય પિશાચાસ્ય
પ્રકુન્દકુન્દદન્તરાદ્રિસુન્દર સર્વભૂતવિજૃમ્ભણપ્રિય
અર્ધમુણ્ડાર્ધવક્ત્રાર્ધનાસિકાર્ધદેહસાર્ધ ઘટનાર્ધ
ભગલલાટ ભગનન્દન ભગનાસિક ભગનેત્ર
હરપ્રિય વારિવાહ-વરાહપિપ્પલાયુધાઙ્ગારકભક્ષણ
દ્વિશિખત્રિશિખપઞ્ચશિખદીર્ઘહ્રસ્વસ્થૂલસૂક્ષ્મ ગુરુલઘુ
વજપાણિચક્રપાણિપ્રિય શ્રેષ્ઠવિક્રમાદ્રિસોમ નન્દિનારાયણ
શ્રીધરશ્રીપતિસર્વાઙ્ગશિરશ્છેદ નારદનાગદન્તપુષ્પદન્તપ્રિય
ઓઙ્કારવષટ્કારસુગમસૂત્રપીઠનલોક સારયજ્ઞહર દક્ષહર
યૂપોત્પાટનાગ્નિજિહ્વાસમુત્પાટન નિકુમ્ભક્ષેત્રજ્ઞ ક્ષેત્રભાનુકમ્પપ્રિય
અસિતવામદેવચક્રાયુધકૂશ્માણ્ડકઙ્કણકાકપાદ-કાલવિમર્દનપ્રિય
કટકટકઙ્કટસઙ્કટપ્રિય એકવક્ત્ર-બહુવક્ત્રાસ્યવક્ત્ર
સિંહવક્ત્રશાર્દૂલવક્ત્ર-હરિણવક્ત્ર-કોકિલવક્ત્ર-વક્ત્રોલકવક્ત્રાનેકવક્ત્રપ્રિય
શિષ્ટાષ્ટપુષ્ટવિશ્વમ્ભરાદિકષ્ટ-વિમર્દનપ્રિય

ખણ્ડરુણ્ડાભરણ ચણ્ડાભરણ ફણિભૂષણ નાનાપ્રમથ
ગણનાયકપ્રિય કુઞ્જરમુખપ્રિય ષડાનનપ્રિય ઋભૂપમન્યુ
?? વાગાસ્ય શ્વેત મુનિમાર્કણ્ડેયપ્રિય સનકસનન્દનસનત્કુમારપ્રિય
વિભૂતિપ્રિય રુદ્રાક્ષપ્રિય પઞ્ચામૃતપ્રિય પઞ્ચગવ્યપ્રિય
ચન્દનકુઙ્કુમગોરોચનપ્રિય નીલોત્પલરક્તોત્પલમહોત્પલપ્રિય
મહિષાક્ષગુગ્ગુલુધૂપપ્રિય કર્પૂરદીપપ્રિય ગીતપ્રિય વાદ્યપ્રિય
કૃષ્ણાષ્ટમીપ્રિય કૃષ્ણચતુર્દશીપ્રિય અવધૂતપ્રિય ભોજરાજપ્રિય
મલયરાજપ્રિય શ્રીદણ્ડીપ્રિય મેધાવિરુદ્ધપ્રિય ભટ્ટબાણપ્રિય
ઉદ્ભટપ્રિય કેશિરાલપ્રિય દાસ- મય્યપ્રિય વરગુણ્ડપ્રિય
અણ્ડવરદપ્રિય મલ્હણપ્રિય બલ્લાડપ્રિય કુમરગુણ્ડય્યપ્રિય
અખિલભુવનજભક્તજનપ્રિય દેવ ॥ ૪॥

સુરપતિપ્રમુખનિખિલપ્રાર્થિતપ્રધાનપરમેશ્વર દેવ નમસ્તે
નમસ્તેનમસ્તે નમઃ ॥ ૫॥

શ્રીમન્માહેશ્વરઃ શિષ્યો મલ્લિકાર્જુનપણ્ડિતઃ ।
શ્રીમુખદર્શનગદ્યં હૃદ્યં ગ્રથિતવાન્ (મુદા) ।

॥ ઇતિ શ્રીશિવસ્તવગદ્યં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivastavagadyam*
pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*